अवोचदेनं गगनस्पृशा रघुः
स्वरेण धीरेण निवर्त्तयन्निव ॥")
पीतवर्णः । इत्यनेकार्थकोषः ॥

हरिकः, पुं, ( हरिरिव । हरि+स्वार्थे संज्ञायां वा कन् । ) पीतहरितवर्णाश्वः । तत्पर्य्यायः । हालकः २ । इति हेमचन्द्रः ॥ चौरः । अक्षक्रीड़कः । इति केचित् ॥

हरिकेलीयः, पुं, ( हरिकेलिमर्हतीति । हरिकेलि +छः । ) वङ्गदेशः । इति हेमचन्द्रः । तद्देशस्थे, त्रि ॥

हरिकेशः, पुं, ( हरिः पिङ्गलः केशो यस्य । ) शिवः । इति केचित् ॥ ( यथा, महाभारते । १३ । १७ । ४४ ।
"दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ॥"
विष्णुः । यथा, महाभारते । ६ । ६२ । ५० ।
"महोरग वराहाद्य हरिकेश विभो ! जय ॥")
शिवभक्तयक्षविशेषः । स तु शिवप्रसादात् दण्डपाणित्वं क्षेत्रपालत्वादिकञ्च प्राप्तवान् । यथा,
"एवमुक्त्वा ततो देवः सह देव्या जगत्पतिः ।
जगाम यक्षो यत्रास्ते कृशो धमनिसन्ततः ।
तं दृष्ट्वा प्रणतं भक्त्या हरिकेशं वृषध्वजः ।
दिव्यं चक्षुरदात्तस्मै येनापश्यत् स शङ्करम् ॥
सूत उवाच ।
अथ यक्षस्तदा तत्र शनैरुन्मील्य चक्षुषी ।
अपश्यत् स शिवं देवं वृषं श्वेतमुपाश्रितम् ॥
देव उवाच ।
जरामरणनिर्मुक्तः सर्व्वशोकविवर्ज्जितः ।
भविष्यसि गणाध्यक्षो वरदः सर्व्वपूजितः ॥
अजेयश्चापि लोकानां योगैश्वर्य्यसमन्वितः ।
अन्नदश्चापि लोकेभ्यः क्षेत्रपालो भविष्यसि ॥
महाबलो महासत्त्वो ब्रह्मण्यो मम च प्रियः ।
त्र्यक्षश्च दण्डपाणिश्च महायोगी तथैव च ॥
उद्भ्रमः सम्भ्रमश्चैव गणौ ते परिचारकौ ।
तवाज्ञया करिष्येते लोकस्योद्भ्रमसम्भ्रमौ ॥"
इति मात्स्ये । १० । ८८—९० ; ९६—९९ ॥

हरिक्रान्ता, स्त्री, ( हरिणा क्रान्ता । ) विष्णुक्रान्ता । इति राजनिर्घण्टः ॥

हरिगृहं, क्ली, ( हरेर्गृहम् । ) हरेरालयः । पुरीविशेषः । तत्पर्य्यायः । एकचक्रम् २ शम्भपुरी ३ । इति त्रिकाण्डशेषः ॥

हरिचन्दनं, पुं, क्ली, (हरेरिन्द्रस्य प्रियं चन्दनम् ।) देवतरुविशेषः यथा,—
"पञ्चैते देवतरवो मन्दारः पारिजातकः ।
सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥"
इति स्वर्गवर्गे अमरः । १ । १ । ५३ ॥
देवभूमावेव सम्भवात् देवतरुः । चन्दयति आह्लादयति चन्दनं चदि आह्लादे दीप्तौ नन्द्यादित्वादनः । हरेरिन्द्रस्य चन्दनं हरिचन्दनम् । इति तट्टीकायां भरतः ॥ * ॥ चन्दनविशेषः । तत्पर्य्यायः । तैलपर्णिकम् २ गोशीर्षम् ३ । इति मनुष्यवर्गे अमरः । २ । ६ । १३१ ॥ चौषि हरिचन्दने । चन्दनविशेषाणां पृथक् पृथक् नामानीत्यन्ये । तथा च तिलस्येव पर्णमस्य तिलपर्णो वृक्षभेदः ततो जातं तैलपर्णिकम् । धवलं सुशीतलं चन्दनं तैलपर्णिकम् । गोः शीर्षं गोशीर्षं तदाकारे मलयैकदेशे जातं गोशीर्षम् । कालताम्रश्यामिश्रवर्णमुत्पलगन्धि अतिसुरभि शीतलतया सदैव सर्पैर्वेष्टितं गोशीर्षम् । कपिलवर्णत्वात् हरि च तच्चन्दनञ्चेति हरिचन्दनम् । हरेरिन्द्रस्य चन्दनं वा । हरिर्मण्डूकस्तदाकारे पर्व्वतभागे जातत्वाद्वा हरिचन्दनम् । इति भरतः ॥ तत्पर्य्यायान्तरं सुरार्हम् २ हरिगन्धम् ३ इन्द्रचन्दनम् ४ दिव्यम् ५ दिविजम् ६ महागन्धम् ७ नन्दनजम् ८ लोहितजम् ९ । हरिचन्दनं कोङ्कणे प्रसिद्धम् । अस्य गुणाः ।
"हरिचन्दनन्तु दिव्यं हिमं तदिह दुर्व्वहं मनुजैः ।
पित्ताटोपविलोपि वमथुभ्रमशोषमान्द्यमेदोहृत् ॥"
इति राजनिर्घण्टः ॥ * ॥
( पीतचन्दनम् । कलम्ब इति लोके ।
"कालीयकन्तु कालीयं पीताभं हरिचन्दनम् ।
हरिप्रियं कालसारं तथा कालानुसार्य्यकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पारिभाषिकहरिचन्दनं यथा,—
"हृष्टञ्च तुलसीकाष्ठं कर्पूरागुरुयोगतः ।
अथवा केशरैर्योज्यं हरिचन्दनमुच्यते ॥"
इति पाद्मे पातालखण्डे १२ अध्यायः ॥

हरिचन्दनं, क्ली, (हरिचन्दनं तद्वद्वर्णोऽस्त्यस्येति । अच् । ) ज्योत्स्ना । कुङ्कुमम् । इति मेदिनी ॥ पद्मकेशरम् । इति हलायुधः ॥ कान्ताङ्गम् । इति शब्दरत्नावली ॥

हरिणः, पुं, (हरति मनः ह्रियते गीतादिना वा । हृ+"श्यास्त्याहृञविभ्य इनच् ।" उणा० २ । ४६ । इति इनच ।) स्वनामाख्यातपशुः । तत्पर्य्यायः । मृगः २ कुरङ्गः ३ वातायुः ४ अजिनयोनिः ५ । इत्यमरः । २ । ५ । ८ ॥ सारङ्गः ६ चलनः ७ पृषत् ८ भीरुहृदयः ९ मयुः १० । इति जटाधरः ॥ चारुलोचनः ११ जिनयोनिः १२ कुरङ्गमः १३ ऋष्यः १४ ऋश्यः १५ रिष्यः १६ रिश्यः १७ एणः १८ एणकः १९ । इति शब्दरत्नावली ॥ कृष्णतारः २० सुलोचनः २१ पृषतः २२ । अस्य मांसगुणाः ।
"एणस्य मांसं लघु शीतहृष्यं
त्रिदोषहृत् षड्रसदञ्च रुच्यम् ।
कुरङ्गमांसं मधुरञ्च यद्वत्
कफापहं पित्तहरं मरुत्प्रदम् ॥"
इति राजनिर्घण्टः ॥ * ॥
अपि च ।
"हरिणः शीतलो बद्धविण्मूत्रो दीपनो लघुः ।
रसे पाके च मधुरः सुगन्धिः सन्निपातहा ॥
एणः कषायो मधुरः पित्तासृक्कफनाशनः ।
संग्राही रोचनो हृद्यो बलकृज्ज्वरनाशनः ॥"
इति राजवल्लभः ॥ * ॥
अन्यच्च ।
"कुरङ्गो बृंहणो बल्यः शीतलः पित्तहृद्गुरुः ।
मधुरो वातहृद् ग्राही किञ्चित्कफकरो मतः ॥
इति भावप्रकाशः ॥ * ॥
हरिणस्य पञ्चभेदो यथा,—
"हरिणश्चापि विज्ञेयः पञ्चभेदोऽत्र भैरव ।
ऋष्यः खड्गो रुरुश्चैव पृषतश्च मृगस्तथा ।
एते बलिप्रदानेषु चर्म्मदाने च कीर्त्तिताः ॥"
इति कालिकापुराणे ६६ अध्यायः ॥ * ॥
शुक्लवर्णः । विष्णुः । शिवः । ( यथा, महाभारते । १३ । १७ । ११९ ।
"आषाढश्च सुषाढश्च ध्रुवोऽथ हरिणो हरः ॥")
सूर्य्यः । हंसः । इति केचित् ॥ ( ऐरावतवंशोद्भूतनागविशेषः । यथा, महाभारते । १ । ५७ । ११ ।
"पारावतः पारिजातः पाण्डरो हरिणः
कृशः ।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः ।
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम् ॥")
पाण्डुवर्णः । तद्युक्ते, त्रि ॥ इत्यमरः । १ । ५ । १३ ॥
( यथा, महाभारते, । १ । १ । १३५ ।
"स भोगान् विविधान् भुञ्जन् रत्नानि विविधानि च ।
कथितो धृतराष्ट्रस्य विवर्णो हरिणः कृशः ॥")

हरिणनर्त्तकः, पुं, (हरिण इव नृत्यतीति । नृत्+ ण्वुल् । ) किन्नरः । इति शब्दरत्नावली ॥

हरिणहृदयः, त्रि, ( हरिणस्येव भीतं हृदयं यस्य । ) भीरुः । इति शब्दरत्नावली ॥

हरिणाक्षी, स्त्री, हट्टविलासिनीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ ( हरिणस्य अक्षिणीव अक्षिणी यस्याः । समासे षः । ङीप् । मृगलोचना रमणी ॥ )

हरिणाङ्कः, पुं, ( हरिणः अङ्कचिह्नं यस्य । ) चन्द्रः । इति शब्दरत्नावली ॥

हरिणी, स्त्री, ( हरिण+ङीष् ।) मृगी । (यथा, रघुः । २ । ११ ।
"धनुर्भृतोऽप्यस्य दयार्द्रभाव-
माख्यातमन्तःकरणैर्विशङ्कैः ।
विलोकयन्त्यो वपुरापुरक्ष्णां
प्रकामविस्तारफलं हरिण्यः ॥" )
स्वर्णप्रतिमा । इत्यमरः । ३ । ४ । ५० ॥ ( हरित+ ङीष् । तस्य नः ।) हरिता । नारीभेदः । वृत्तभेदः । इति मेदिनी ॥ ( तल्लक्षणं यथा,—
"नसमरला गः षड्वेदैर्हयैर्हरिणी मता ॥"
विस्तारस्तु छन्दःशब्दे द्रष्टव्यः ॥ ) मञ्जिष्ठा । स्वर्णयूथी । इति राजनिर्घण्टः ॥ तरुणी । वरस्त्री । इति शब्दरत्नावली ॥ (सुराङ्गनाभेदः । यथा, रघुः । ८ । ७९ ।
"चरतः किल दुश्चरं तपस्तृणबिन्दोः परिशङ्कितः पुरा ।
प्रजिघाय समाधिभेदिनीं
हरिरस्मै हरिणीं सुराङ्गनाम् ॥")